# Sita Janmotsava Stutih

# સીતાજન્મોત્સવસ્તુતિઃ

## Document Information

Text title : Narayanakrita Sita Janmotsava Stuti

File name : sItAjanmotsavastutiH.itx

Category : devii, sItA, stuti

Location : doc_devii

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : bhushuNDirAmAyaNam | pashchimakhaNDa | adhyAya 18/1-51||

Latest update : August 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 26, 2024

*sanskritdocuments.org*

# સીતાજન્મોત્સવસ્તુતિઃ

શ્રીનારાયણ ઉવાચ ।
નતોઽસ્મિ નિત્યં જગદીશ્વરેશ્વરિ ત્વદઙ્ઘ્રિસન્તાનકપુષ્પયુગ્મકમ્ ।
ચિરં યદાખાદ્ય રસોઽપ્યહં સદા ભવામિ નિત્યોદયિ દિવ્યચેષ્ટિતઃ ॥ ૧॥

અસૌ વિધિઃ સર્ગવિસર્ગયોઃ ક્ષમસ્તથાહમેતત્પરિપાલનપ્રભુઃ ।
હરસ્તથા સંહરણેઽસ્ય કોવિદસ્તદેતદારાધનમીશિ તાવકમ્ ॥ ૨॥

અથ તત્રૈત્ય ભગવાન્ નારાયણ ઉદારધીઃ ।
નિજાંશિનીં શ્રીસહજાં તુષ્ટાવ પરમેશ્વરીમ્ ॥ ૩॥

વિભાસિ નિત્યૈવ ચ ચરિત્રધોરણીવિચિન્વતાં વેદપથેષુ વાસ્તવીમ્ ।
વિતન્વતી બ્રહ્મશિવાદિચિન્તનપ્રમોદદાં નિત્યમુદારમાનસે ॥ ૪॥

અચિન્ત્યરૂપાપિ તથા ગુણાતિગાપ્યવાચ્યરૂપાપિ ગિરામધીશ્વરૈઃ ।
વિચિન્તનીયાસિ ગુણૈર્મનોરમાપ્યહો સ્વભક્તૈર્નિતરાં પ્રગીયસે ॥ ૫॥

સઙ્ખ્યાતુમર્હાણિ ન તે જગન્નુતે નામાનિરૂપાણિ ચ વિશ્વપાવિનિ ।
યજ્જ્ઞાનમાત્રેણ ભૃશં જનોઽશ્નુતે ત્રિવર્ગલભ્યાધિકમર્થમુજ્જ્વલમ્ ॥ ૬॥

આદિસ્ત્વમેવાસિ ચ મધ્યમસ્થ વૈ ત્વમેવ ચાન્તસ્ત્રિદશાધિપાધિયે ।
ત્વત્તોઽખિલં વિશ્વમિદં ત્વયિ સ્થિતં ત્વય્યૈવ ચ બ્રહ્મણિ સમ્પ્રલીયતે ॥ ૭॥

ત્વમેવ લોકેશ્વરિભાસિ સર્વગા ત્વમેવ ચાહં ધિષણૈકગોચરઃ ।
ત્વમેવ વિત્તિસ્ત્વમહમ્પદાર્થયોઃ સશબ્દશબ્દાર્થપરિચ્છિદાકૃતિઃ ॥ ૮॥

યાન્યેવ નામાનિ ખિલસ્ય વસ્તુનસ્તાન્યેવ તે સર્વપદાર્થરૂપિણિ ।
ન હિ ત્વદન્યં કલયન્તિ કોવિદાઃ શબ્દેન ચાર્થેન ચ ભાવિતાકૃતિઃ ॥ ૯॥

ઉપાસનં તે જગદીશિ કર્મભિર્જ્ઞાનેન ભક્ત્યા ચ વિશુદ્ધરૂપયા ।
યસ્ત્વાં ભવે દ્વેષ્ટિ સમસ્તરૂપિણી સર્વં પરાદાદમુતો હિ તત્ત્વતઃ ॥ ૧૦॥

અતસ્ત્વમેવાખિલવર્ત્મસુ સ્થિતા કરોષિ કલ્યાણકદમ્બકં ભવે ।

તેજં સુ યદ્વત્સકલેષુ સંસ્થિતો વિભાતિ ભાસા રવિરેવ કેવલઃ ॥ ૧૧॥

માયા પ્રધાનં પ્રકૃતિસ્તથૈવ ચાવ્યક્તકલ્પેત્યાદિપદાર્થરૂપિણીમ્ ।
બ્રુવન્તિ યે ત્વાં જગદીશિ તેઽબુધા ન તત્ત્વતસ્ત્વાં કિમપાહ જાનતે ॥ ૧૨॥

બ્રહ્મેતિ યે ત્વાં પ્રવદન્તિ નિર્ગુણં તેઽપ્યઞ્જસા નૈવ વિદન્તિ વસ્તુતઃ ।
યતઃ પ્રતિષ્ઠાસિ પરસ્ય તસ્ય ચિન્માત્રસ્યસચ્ચિત્સુખધર્મધર્મિણિ ॥ ૧૩॥

સર્વં ખલુત્વય્યુપપન્નમઞ્જસા ગુણાંશ્ચ નૈર્ગુણ્યમપિ પ્રભાવિતમ્ ।
યથા ઘને સૈન્ધવખણ્ડ ઉજ્જ્વલે બહિસ્તથાભ્યન્તરમેકવસ્તુતા ॥ ૧૪॥

ત્વમેવ ધર્મસ્ય પ્રસરસ્ય ધર્મિણી ન ભેદતોઽસ્તિ ત્વયિ ધર્મધર્મિતા ।
અથાપિ ચેદસ્તુ યતોઽખિલાત્મકે ભિદા પદાર્થોઽપિ ન ભિદ્યતે પરમ્ ॥ ૧૫॥

ત્વયીદૃશેવસ્તુનિ સચ્ચિદાત્મકે વિરુદ્ધભાવપ્રસરોઽપિ નેષ્યતે ।
અસ્ત્યુષ્ણતા તેજસિ વાર્યનુષ્ણતા સમુચ્ચિતં ત્વય્યુભયં નિરીક્ષતે ॥ ૧૬॥

ધ્વનિશ્ચ વર્ણશ્ચ પદં ચ સુપ્તિઙૌ વાક્યં મહાવાક્યમથાગમોઽખિલઃ ।
ત્વમેવ હિ વ્યાસસમાસરૂપતઃ પ્રપઞ્ચમે વાક્પ્રસરેણ વિશ્વતઃ ॥ ૧૭॥

અનાદિરેષ દ્રુમ ઉદ્યયૌ યતો ન મૃગ્યતે મૂલમમુષ્ય તત્ક્વચિત્ ।
ત્વાં તુ પ્રવિજ્ઞાય વિનિશ્ચિતં ભવેદ્યત્રાનિશં સન્દિહતે બુધા અપિ ॥ ૧૮॥

સાક્ષાત્કદાચિત્પુરુષેઽખિલં સ્વયં ત્વં પૂરુષદ્વારતયા કદાચન ।
નિજૈચ્છયૈવેશિ કદાચિદન્યથા કદાચિદાત્મૈવ સમસ્તમાબભૌ ॥ ૧૯॥

વિતત્ય સર્વં ચ કદાચિદાત્મના કરોષિ માતસ્ત્વમનુપ્રવેશનમ્ ।
ઇત્થં પ્રપઞ્ચે રમસે સ્વનિર્મિતે યતઃ સમસ્તો રમણાર્થમેવ ॥ ૨૦॥

તવૈવ ચેષ્ટાત્મક એષ એધતે કાલઃ કલાકોટિકદમ્બકપ્રભુઃ ।
યે વસ્તુમાત્રોપરિ લેઢિ ત તદ્ગુણાન્ સ લિહ્યતે ચિત્કલયા કિલ ત્વયા ॥ ૨૧॥

અથ સ્વરૂપેણ ચરિત્રધોરણીમધિપ્રમોદાટવિ યદ્વિતન્વતી ।
અત્યુદ્ભુતૈઃ ક્રીડસિ વિશ્વમઙ્ગલૈર્ગુણૈર્મહોદારતરૈઃ પરાત્પરૈઃ ॥ ૨૨॥

વિજૃમ્ભતેસા કરુણાત્મતા તવ સ્વભક્તવર્ગેષુ તદેકજીવિષુ ।
વિચિન્તયેયુઃ ખલુ તે કિમન્યથાભવાપવર્ગેચ્છુતયા વિરક્તાઃ ॥ ૨૩॥

(યુગ્મં)કાલઃ સ્પૃશત્યેવ ન તે વિચેષ્ટિતં સચ્ચિત્સુખૈકાત્મતયા પરાત્પરમ્ ।
અતોઽસ્ય મૂર્દ્ધ્નિ સ્વપદં નિધાય તે ક્રીડન્તિ સર્વસ્વભુજો ભવજ્જનાઃ ॥ ૨૪॥

નમામિ તે રૂપમદભ્રવિભ્રમં કર્ણાવતંસીકૃતરત્નમઞ્જરિ ।
મહાચ્છનાસામાણીશોભિતાનનં સ્ફુરત્કપોલાલકવલ્લિમઞ્જુલમ્ ॥ ૨૫॥

પરાર્દ્ધરત્યુત્કટરૂપસમ્પદા વિરોચમાનાઙ્ઘ્રિનખપ્રભાભરમ્ ।
લીલાલસાલોલગતિક્રમોદ્ભવત્રપાવિનમ્રીકૃતરાજહંસકમ્ ॥ ૨૬॥

સકેલિકૂજન્મણિનૂપુરધ્વનિચ્છાત્રી કૃતોદ્યત્કલહંસનિક્વણં
મઞ્જીરિકાધોઽઞ્ચિતહેમકિઙ્કિણીગણોપધિસ્વૈરવ ગુઞ્જષટ્પદમ્ ॥ ૨૭॥

મન્દાનિલાન્દોલિદુકૂલકાન્તરપ્રસૃત્વરજ્યોતિ રુદગ્રપીડિકમ્ ।
તામ્બૂલિકામત્રમનોજઘુણ્ટિકાનિરીક્ષણોન્માદિતમન્મથાન્તરમ્ ॥ ૨૮॥

કરીન્દ્રશુણ્ડાકદલીકલામુષોઃ સુજઙ્ઘયોઃ કાન્તિભરેણ ચિન્તયત્ ।
વાસોત્તરીયં તનુસૂત્રનિર્મિતં હેમામ્બુનિર્ણિક્તમિવાચ્છમદ્ભુતમ્ ॥ ૨૯॥

નિતમ્બબિમ્બદ્વિતયદ્યુતિચ્છટાવિનિર્જિતાર્કેન્દુસુપૂર્ણમણ્ડલમ્ ।
અધસ્તરોયામ્બરપટ્ટદોરિકાવિલમ્બિગુચ્છાકૃતિ મૌક્તિકવ્રજમ્ ॥ ૩૦॥

ગમ્ભીરનાભીહૃદમાધુરીરસપ્રમગ્નરામેન્દુરસીન્દ્રમાનસં
તદુદ્ભવાનેકબલીતરઙ્ગિણીત રઙ્ગનીરોત્તરલીકૃતાન્તરમ્ ॥ ૩૧॥

રોમાવલીતદ્ગતશૈવલાવલીવિલીનહૃચ્છ્રીરસિકેન્દ્રપક્ષિરાટ્
તનૂદરસ્થાનનિતાન્તસંશયજ્ઞાનસ્થદોલાદુલિતાખિલાશયઃ ॥ ૩૨॥

ઉત્તુઙ્ગવક્ષોરુહભારભાવિતશ્રીવિગ્રહાત્યન્તવિનમ્રતારુચિ
અનેકમુક્તામણિહારભાસુરગ્રીવાવિલગ્નત્રિસરાતિસૌભગમ્ ॥ ૩૩॥

પઞ્ચાશુગોદ્ભાવિતલોકનિર્જયધ્વાનોદ્ભવવ્યઞ્જનકણ્ઠકમ્બુમત ।
અનેકકોટિસ્ફુટચન્દ્રમણ્ડલશ્રીચૌરવક્ત્રચ્છવિસારભાસુરમ્ ॥ ૩૪॥

મુખેન્દુપૂર્ણામયસર્વવાસરપ્રમોદિદૃક્ચારુચકોરરોચિતમ્ ।
ધમ્મિલ્લમલ્લીસુમનોઽભિગુમ્ફિતમધુવ્રતાસાદિતમાધુરીરસમ્ ॥ ૩૫॥

તદેતસીમન્તિતદિવ્યમૌક્તિકપ્રકૃષ્ટતારાવલિકાન્તકીર્તિમત્ ।
અમન્દવેણીમણિચન્દ્રચન્દ્રિકાપ્રકાશસન્તોષિતનેત્રકૈરવમ્ ॥ ૩૬॥

દન્તાવલિદ્યોતવિમિશ્રનિર્મલશ્રીમન્દહાસામલમઞ્જુકાન્તિમત્ ।
દોર્વલ્લિવલ્ગુસ્ફુરિતાંસયુગ્મકપ્રકાણ્ડનિત્યોદ્ધુરતાવિરાજિતમ્ ॥ ૩૭॥

નખૌઘમારભ્યશિખાન્તમુચ્ચકૈરેકૈકમેભિર્નયનૈરુપાસિતમ્ ।
કટાક્ષસઞ્જીવિતસર્વમારિતસ્મરપ્રવીરપ્રવરપ્રમોદદમ્ ॥ ૩૮॥

યદ્યપ્યદોઽઙ્ગં તવ સર્વમદ્ભુતં તથાપિ મન્માનસબન્ધનાય તે ।
સદાસ્તુ પાદામ્બુજયુગ્મમુલ્લસન્નખૌઘકિઞ્જલ્કસમૂહઞ્જિતમ્ ॥ ૩૯॥

ધ્યાનાય ગાનાય ચ ભક્તચેતસાં પ્રમોદદાનાય ચ નિત્યમેધતામ્ ।
તવેદૃશં સૌભગમઙ્ગમાધુરીવિમિશ્રમત્યર્થમનોહર પ્રભોઃ ॥ ૪૦॥

પ્રમોદનામાઙ્કિતમદ્ભુતં વનં લીલાલયં મે હૃદયે વિરાજતામ્ ।
યદંશમાત્રૈવ વિભાતિ માધુરી વૈકુણ્ઠવૃન્દાવનગહ્વરાદિષુ ॥ ૪૧॥

લીલાધામવિશિષ્ટમદ્ભૂતતમં શ્રી સમ્પદાં મન્દિર
સચ્ચિદ્રૂપમનન્તમક્ષરમયં યદ્વ્યાપકં વિશ્વતઃ ।
તત્તે ધામ વિરાજતાં મમ હૃદિ શ્રીરામરામેરમે
પ્રેમાનન્દમયં મનશ્ચ વચનં સુશ્રુન્નિવૃત્તં યતઃ ॥ ૪૨॥

લીલાસ્તાસ્તવ રાસસન્નિધિમિતા ભક્તાખિલાસ્વાદિતા
વ્યક્તાવ્યક્તતયા પ્રમોદવિપિને સજાયમાનાઃ પરાઃ ।
ભક્તાનાં હૃદયૈકચિન્તનરસપ્રેમપ્રવૃદ્ધપ્રદા
ભૂયાસુર્મમજીવનાય સહજાનન્દે ગુણગ્રામણીઃ ॥ ૪૩॥

પરં બ્રહ્મ રામચન્દ્રઃ સચ્ચિદાનન્દમાત્રકઃ ।
યદીદૃશં ન પ્રભવેદ્ભક્તાનાં જીવનં કથમ્ ॥ ૪૪॥

પ્રમોદપાત્રીકૃતભક્તમાનસં બ્રહ્માદિદેવૈરપિ સુષ્ટુ ભાવિતમ્ ।
લીલારસાનન્દત્રયં વિરાજિતં સમેધતાં મદ્ધૃદયૈકજીવનમ્ ॥ ૪૫॥

નમઃ શ્રીનન્દનાખ્યાય ગોપરાજાય ધીમતે ।
નમસ્તથા શ્રીરાજિન્યૈ યાભ્યાં ત્વં નિત્યલાલિતા ॥ ૪૬॥

નમસ્તદાવેશયુઙ્ભ્યાં વાત્સલ્યરસવુષ્ટાભ્યામ્ ।
ભાગ્યવદભ્યાં ત્રિભુવનસૌખ્યકાભ્યાં નિરન્તરમ્ ॥ ૪૭॥

દશરથકૌસલ્યાભ્યાં સુખિતશ્રીમાઙ્ગલ્યકાભ્યાં ચ ।
ત્રિભુવન સૌરાજ્યપદપ્રભાવિતાભ્યાં નમો નિત્યમ્ ॥ ૪૮॥

નમસ્તે નિત્યપૂર્ણાયૈ લીલાયૈ મધુરશ્રિયે ।
યદાવેશવશાદેતન્મિથુનં નિત્યં ભાસતે ॥ ૪૯॥

ઇતિ સ્તુત્વાસ્ફુરલ્લીલારસાવેશિતયા મુહુઃ ।

રોમાઞ્ચિતતનુર્વિષ્ણુર્દણ્ડવત્પ્રાપતદ્ભુવિ ॥ ૫૦॥

મુહુર્મુહુઃ સ્તુતિં કૃત્વા નતિં કૃત્વા મુહુર્મુહુઃ ।
કૃતાર્થીકૃત્ય ચાત્યાનં સ્વધામ સમગાત્તતઃ ॥ ૫૧॥

ઇતિ શ્રીમદાદિરામાયણે બ્રહ્મભુશુણ્ડસંવાદે પશ્ચિમખણ્ડે ભરતલક્ષ્મણીયે
સીતાજન્મોત્સવેઽષ્ટાદશોઽધ્યાયઃ ॥ ૧૮॥

ભુશુણ્ડિરામાયણમ્ । પશ્ચિમખણ્ડ । અધ્યાય ૧૮/૧-૫૧॥

bhushuNDirAmAyaNam . pashchimakhaNDa . adhyAya 18/1-51..

Encoded and proofread by Mrityunjay Rajkumar Pandey

*Sita Janmotsava Stutih*
pdf was typeset on August 26, 2024

Please send corrections to *sanskrit@cheerful.com*